# HSE-II MODEL EXAMINATION 2011-2012

Marks-80

Time-2.30 Mts

निर्देशाः-सर्वे प्रश्नाः समाधेयाः।

उत्तरलेखनात् पूर्वं प्रश्नान् प्रश्ननिर्देशान् च सम्यक् पठत।

प्रश्नवाचनाय 15 निमेषाः अधिकतया कल्पिताः

**1.अधः प्रदत्तं श्लोकं सम्यक् पठत।**
**प्रदत्तानां प्रश्नानां उत्तराणि लिखत।** (Score:5)

सावतीर्य नभसो निशाचरी गूढमेव निषसाद कुत्रचित्।
सा च सुप्त इव लक्षिते सुते स्वापमाप सरसीरुहेक्षणा।।

1.सावतीर्य नभसो निशाचरी—निशाचरी का ?
2. निद्रा इत्यर्थे प्रयुक्तं पदं किं ?
3.अस्मिन् श्लोके विद्यमानं ल्यबन्तम् अव्ययं चित्वा लिखत
4.अस्य श्लोकस्य आशयं स्व वाक्यैः लिखत

**2. 'वपुषा केवलमावयोर्हिभेदः'इदं वाक्यं केन कं प्रति उक्तं** ? (Score:2)

**3. सूचनाः अनुसृत्य कृष्णेन कृतं पूतनायाः वधं वर्णयित्वा लघूपन्यासं लिखत।** (Score:8)

**सूचनाः**- पूतनायाः आगमनं, गानश्रवणं, कृष्णस्य स्तन्यपानं,
गोपानां आगमनं तेषां विस्मयं च।

**4. सूचनाः अनुसृत्य आस्वादनटीकां लिखत।** (Score:4)

तदेषु नैकोऽपि भुवं गतो मे शक्नोति कर्तुं प्रतिकूलभावम्।
महीयसः किं घटते परागः समीरणस्याभिमुखं प्रसक्तुम्।।

**सूचनाः**- श्लोकस्याशयं-औचित्यं-पदप्रयोगचारुता

**5. यशोदायाः गानं एकया खण्डिकया प्रतिपादयत।** (Score:4)

**6. कोष्टकात् उचितम् उत्तरं निर्धार्य लिखत।** (Score:5)

1.)कृष्णस्य अपरं नाम किम्?       (मधुजित्, पार्थः, वृकोदरः)
2.)श्यामो युवा कस्य वर्णनमिदम्? (अर्जुनस्य,वासुदेवस्य,दुर्योधनस्य)
3.)सुचिरं तस्य सुमङ्गलानि दध्यौ-क? (कंसः, नन्दगोपः,श्रीकृष्णः)
4.)काञ्चुकीयस्य नाम किम्?        (विजयः, बादरायणः, देवदत्तः)
5.)अन्त्यं ऋणं किम्?              (देवऋणं, ऋषिऋणं, पितृऋणं)

**7. युष्माकं सहोदर्याः विवाहं प्रचलति इति संभाव्य तस्मिन् भागं कर्तुं युष्माकं सुहृदं प्रति लेखमेकं लिखत।** (Score:6)

**8. 'सर्वं खल्विदं ब्रह्मा'। अस्मिन् वाक्ये अव्ययपदं किं ?** (Score:2)

**9. दूतवाक्ये वर्णितं कृष्णदुर्योधनयोः संवादम् अधिकृत्य एकम् उपन्यासं लिखत।** (Score:8)

**सूचनाः**-कृष्णस्य आगमनं-सन्देशज्ञापनं-दुर्योधनस्य वितर्काः-कृष्णस्य प्रतिवचनानि-विश्वरूपप्रदर्शनं

**10.अधोनिर्दिष्टेषु श्लोकेषु भवतां इष्टतमं श्लोकं कम् इति सकारणं लिखत।** (Score:4)

1) लब्ध्वा निधानं न तथा दरिद्रो गतिं समासाद्य तथा न पंगुः।
तथा न चान्धो दृशमाप्य हृष्येत् यथाप्तकपुत्रस्स जहर्ष नन्दः।।

2) सन्दिह्यमोहाद्वसुदेववाक्यं मयाप्रमाणाकृतभूतवाचा।
हता कनृशंसेन सुता भगिन्याः तेनाविलं मे हृदयं यशोऽपि।।

3) सरसिरुहवने गतेऽपि निद्रां कथमिव ते नयानांबुजे विनिद्रे।
श्रुतिपरिचयशालिनोऽहि कर्म स्वजननिवेषितमेव शंश्रयन्ते।।

**11.चतुर्णां नाटकसंकेतानां लघुटिप्पणीः लिखत।** (Score:8)

1) नान्दी 2) सूत्रधारः 3) काञ्चुकीयः 4) नेपत्थ्यम् 5) भरतवाक्यम् 6) स्वगतम्

**12.अधोलिखितं गद्यभागं प्रादेशिकभाषया अनुवदत।** (Score:5)

महाकविः कालिदासः विश्वसाहित्यमण्डले समुन्नतं स्थानम् अलङ्करोति।

भारतीयाः कालिदासं कविकुलगुरः इति स्मरन्ति।पाश्चात्याः तं "भारतीयशेक्स्पियर्"इति बहुमन्यन्ते।सः विक्रमादित्यमहाराज्ञः सदस्यः इति प्रसिद्धिः।कालिदासस्य उत्कृष्टरचना अभिज्ञानशाकुन्तलं भवति।

**13.अधो लिखितानि वाक्यानि संस्कृतभाषया अनुवदत।** (Score:3)

1.അദ്ധ്യാപകന് കുട്ടികളെ പാഠങ്ങള് പഠിപ്പിക്കുന്നു.

2.വൃക്ഷത്തില്നിന്ന് ഇലകള് വീഴുന്നു.

3.ഗോവിന്ദാ നീ എവിടെ പോകുന്നു ?

**14. प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (Score:4)

नभसो भूषणं चन्द्रः नारीणां भूषणं शीलम्।
पृथिव्याः भूषणं राजा विद्या सर्वस्य भूषणम्।।

1.नभसः भूषणं किम् ?
2.नारीणां भूषणं किम् ?
3.राजा कस्याः भूषणम् ?
4.सर्वस्य भूषणंकिम् ?

**15. अधः प्रदत्तस्य श्लोकस्य गद्यक्रमं लिखत।** (Score:4)

प्रातः प्रलम्बप्रमुखानमात्यान् सर्वान् समाहूय स भोजराजः।
सविभ्रमप्रेरित दृष्टिदत्ते स्थाने निषण्णानवदत् विनीतः।।

प्रातः सः..............सर्वान्............समाहूय सविभ्रमप्रेरितदृष्टिदत्ते स्थाने ....................विनीतः............।

**16.अधोलिखितं श्लोकाशं पठित्वा तस्मिन् सूचिता कथा लिखत।** (Score:6)

वने पतृव्यो मृगयाप्रसङ्गतः कृतापराधो मुनिशापमाप्तवान्।

**17.अधोदत्तां खण्डिकां पठित्वा क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि विविच्य लिखत ।** (Score:5)

अध्यापकः पुस्तकं दृष्ट्वा श्लोकम् आलपति।छात्राः तत् आकर्ण्य अनुकुर्वन्ति। अन्ते अध्यापकः छात्रान् सङ्घरूपेण आलपितुं निर्दिशति।

**18.अधोदत्तं वाक्यं यदा-तदा उपयुज्य परिवृत्य लिखत।** (Score:2)

ध्वान्ते दिशां चक्रवालं रुन्धति सति केनापि किमपि व्यक्तं न अवेदि।

Prepared by Ernakulam Cluster